# Shri Mohiniraja Dhyanam

# શ્રી મોહિનીરાજ ધ્યાનમ્

## Document Information

Text title : Mohiniraja DhyAnam 2

File name : mohinIrAjadhyAnam2.itx

Category : devii, vishhnu, devI, dhyAnam

Location : doc_devii

Transliterated by : Sachin Jahagirdar

Proofread by : Sachin Jahagirdar, NA

Acknowledge-Permission: Mohinirajakshetram, Nevasa, Ahmednagar

Latest update : October 20, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 20, 2022

*sanskritdocuments.org*

# શ્રી મોહિનીરાજ ધ્યાનમ્

ધ્યાયેન્મોહિનિરૂપિણીં ભગવતીં સૂર્યાધ્યુતાં ગધ્યુતીં
    દિવ્યાં ભૂષણભૂષિતાં વરકરાં પીતામ્બરીં સુન્દરીમ્ ।
પીયૂષાં નિજકુમ્ભહસ્તકમલાં નારાયણી શોભનાં
    ભક્તાનાં પ્રવરાતટે સ્થિતિકરાં શ્રી ઇષ્ટદાન્યુત્સુકામ્ ॥ ૧॥

ઉદ્યત્ભાનુસહસ્રદીપવપુષાં જામ્બૂનદાલં કૃતાં
    બ્રહ્મેન્દ્રાદિસુરૈઃ સ્વમૌલિમુનિભિર્નીરાજનં શ્રીપદામ્ ।
ભક્તાભીષ્ટફલપ્રદાઞ્ચ દધતીં હસ્તૈશ્ચતુર્ભિર્ઘટં
    શઙ્ખ ચક્રમસિઞ્ચ રાહુમથિનીં ધ્યાયેત્સદા મોહિનીમ્ ॥ ૨॥

કાન્તે કામિનિ કાલરાત્રકમલે કારુણ્યપૂર્ણે કલે
    માયામોહિનિમઙ્ગલે મધુહરે મહાલયૈ માન્ત્રકે ।
ભર્ગે ભાનિ ભવાનિ ભક્તિ સુરભિર્ભાગ્યૈ કલબ્ધેભયે
    વન્દે વિશ્વસ્રજે વિધન્તુ દહરે વન્દે વિધે વૈષ્ણવીમ્ ॥ ૩॥

કલ્હારોત્પલ કૈરવામ્બુજ દલન્માકન્દસન્મઞ્જરી
    કાન્દણ્ડં કરપઙ્કુજેન પધર્તી પુણ્ડ્રેક્ષુદણ્ડોદ્ભવમ્ ।
સૌવર્ણાઙ્કુશપાશપાણિ વરુણામારક્તવસ્ત્રાવૃતાં
    અમ્બામમ્બુજસન્નિભાં ત્રિનયનાં ચન્દ્રાર્ધચૂડાં ભજેત્ ॥ ૪॥

લક્ષ્મીશોભિત વામભાગમમલાં સિંહાસને સુન્દરં
    સવ્યં ચક્રધરં ચ નિર્ભયકરં વામેન ચાપુમ્બરમ્ ।
સર્પાધીશકૃતાન્તપત્રમમલાં ત્ર્યક્ષાંવિશષ્ટોજ્જ્વલં
    વન્દે દેવમુનીન્દ્રવાન્દિવપદં લક્ષ્મીનૃસિંહં ભજેત્ ॥ ૫॥

અસતવિષમઘ્નીં ભાવગમ્યં પ્રપન્નાં
    અમૃતમમરવર્યોનાસિયત્સિન્ધુમભ્યમ્ ।
કપટયુવતિવેશો મોહયંયઃ સુરારીં
    તમહમુપશ્રવાનાં કામપૂરન્નતોસ્મિ ॥ ૬॥

તમસ્વર્ણવિભાં શશાઙ્કમુકુટાં વન્દે ચતુર્ભિઃકરૈઃ
    બિભ્રાણામસિપાત્રશૂલડમરૂન્ શ્રીમ્હાલસાં શામ્ભવીમ્ ।
ભક્તાભીષ્ટકરાં?ભુજેન્દ્રદિપરાં શ્રીખડ્ગરાજેશ્વરીં
    ગઙ્ગારાધિન પાદુકાં પ્રણમતાં દારિદ્ર્યવિધ્વંસિનીમ્ ॥ ૭॥

શઙ્ખચક્રગદાયુક્તાં વામહસ્તે કુકુપિકામ્ ।
પાદાભ્યાં રાહુદૈત્યાનાં દેવીં ત્રૈલોક્યમોહિનીમ્ ॥ ૮॥

મોહિનિ મોહનાર્થાય મોહિનિ મોહનાપ્રિયે ॥

મોહિનિ તારણાર્થાય મોહિનીરાજ તે નમઃ ॥ ૯॥

મહાલયે મહાદુર્ગે મહાઘોરપરાક્રમે ।
નિવારયે મહાદુઃખ પાહિ માં કરુણેશ્વરિ ॥ ૧૦॥

ક્ષેત્રં વૈ નિધિવાસ નામ કથિતં તત્રૈવ દેવઃ સદા
સ્ત્રીરૂપં ધૃતવાંસ્દિવૌકહિતે લોકૈઃ સદા પૂજ્યતે ।
નેપથ્યં મુકુટઞ્ચ ભૌતિકફલં ભક્ત્યા સદા ધાર્યતે
વામાઙ્ગે મ્હાલસા વિભૂષણયુતા તસ્મૈ નમો વૈષ્ણવે ॥ ૧૧॥

॥ ઇતિ મોહિનીરાજ ધ્યાનમ્ ॥

Devi Mahalasa is known as "Mohiniraj" in the ardhanArInaTeshvara form. The right half of the idol has masculine characterstics of Lord Vishnu. She is in all Her glorious incarnation as Mohini of the Samudra Manthan fame.

Encoded and proofread by Sachin Jahagirdar

*Shri Mohiniraja Dhyanam*

pdf was typeset on October 20, 2022

Please send corrections to *sanskrit@cheerful.com*